# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा एप्रिल् - २०१५

| | | |
|---|---|---|
| कक्षा- आचार्यः - १ (Sem – 2) | **प्रश्नपत्रम् - ४** | गुणाः - ७० |
| विषयः - नव्यव्याकरणम् | **कोड - CC - 4.2.6** | समयः- ११:०० तः २:०० |
| दिनाङ्कः - | | सन्दर्भग्रन्थः - लघुशब्देन्दुशेखरः |

---

प्रथमान्वितिः (युनिट - १)

**प्रश्नः १ द्वयोः एकं ग्रन्थदिशा व्याख्येयम्** (४)

(अ) रमा+ए इत्यत्र 'यस्येति लोपो न, अभत्वात्' इत्येषा पङ्क्तिः व्याख्येया।

(आ) नपुंसकस्य झलचः इत्येतत् सूत्रां व्याख्येयम्।

**प्रश्नः २ द्वयोः किमपि एकं सूत्रं ग्रन्थोक्तदिशा व्याख्येयम्** (१२)

(क) सर्वनाम्नः स्याड्ढ्रस्वश्च (ख) अतोऽम्

**प्रश्नः ३ त्रिषु द्वयोः व्याख्या विधेया** (४)

(क) औङ आपः (ग) जश्शसोः शिः

(ख) ङिति ह्रस्वश्च

द्वितीयान्वितिः (युनिट - २)

**प्रश्नः ४ द्वयोः एकस्य उत्तरं लेख्यम्** (४)

(अ) 'धुग्भ्याम्' इत्येतत् रूपं कथं सिध्यति?

(आ) 'इग्यणः सम्प्रसारणम्' इत्येतत् सूत्रं भाष्यदिशा व्याख्येयम्।

**प्रश्नः ५ द्वयोः कस्याप्येकस्य उत्तरं लेख्यम्** (१२)

(क) 'द्वितीया टौस्स्वेनः' इत्यस्य सूत्रस्य पदच्छेद-उदाहरणादिकं प्रदर्श्य व्याख्यानं विधेयम्।

(ख) 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इत्येतत् सूत्रं शेखरदिशा व्याख्येम।

**प्रश्नः ६ त्रिषु द्वयोः उत्तरं लेख्यम्** (४)

(क) सावनडुहः सूत्रं किं करोति?

(ख) सुगण्ट्सु इत्यत्र टुक्-आगमः केन सूत्रेण भवति?

(ग) 'उगिदचाम्' इत्यत्र 'अचाम्'-शब्देन व्याख्यानात् कस्य ग्रहणं भवति?

तृतीयान्वितिः (युनिट - ३)

**प्रश्नः ७ द्वयोः एकस्य उत्तरं लेख्यम्** (४)

(अ) 'उपानत्' इति शब्दः कथं सिध्यति?

(आ) 'धनुः' इत्यत्र 'र्वोरुपधाया दीर्घ इकः' इति उपधादीर्घत्वं कस्मात् न प्राप्नोति?

**प्रश्नः ८ द्वयोः कस्यापि एकस्य शेखरदिशा व्याख्या विधेया** (८)

(क) आच्छीनद्योर्नुम्। (ख) शप्श्यनोर्नित्यम्।

**प्रश्नः ९ पञ्चसु केषामपि त्रयाणाम् उत्तराणि लेख्यानि** (३)

(क) स्वरादयः, निपाताश्च कां संज्ञां प्राप्नुवन्ति?

(ख) कृन्मेजन्ताः किंसंज्ञकाः भवन्ति?

(ग) 'अस्तिमान्' इत्यस्य शब्दस्य कः अर्थः?

(घ) 'मित्रवत्' इति शब्दः अव्ययं न वा?

चतुर्थी अन्वितिः (युनिट – ४)

**प्रश्नः १० द्वयोः कस्याप्येकस्य सूत्रस्य शेखरदिशा व्याख्या कार्या** (४)

(क) प्राचां ष्फ तद्धितः

(ख) आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्

**प्रश्नः ११ द्वयोः कस्याप्येकस्य उत्तरं लेख्यम्** (८)

(क) 'स्त्रियाम्' इति सूत्रोपरि लघुशब्देन्दुशेखरे कृतां चर्चां विमृशत।

(ख) 'उगितश्च' इत्येतत् सूत्रं शेखरदिशा व्याख्येयम्।

**प्रश्नः १२ पञ्चसु केषामपि त्रयाणाम् उत्तराणि लेख्यानि** (३)

(क) प्रत्ययस्थात्कात्... इत्येतत् सूत्रं पूरयत।

(ख) वयसि प्रथमे इत्यस्य सूत्रस्य किम् उदाहरणम्?

(ग) 'शिल्पिनि ष्वुन्' इत्यस्य सूत्रस्य किम् उदाहरणम्?

(घ) 'गोपालकस्य स्त्री' इत्यर्थे कः शब्दः प्रयुज्यते?

(ङ) 'स्त्रियाम्' इत्येतत् सूत्रं षड्विधेषु सूत्रेषु कीदृशम्?

---